शास्त्री-I खण्ड साहित्यम्

अभिज्ञानशाकुन्तलम्

प्र० (1) - पद्यमिदम् व्याख्येयम् ।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयंश्लोक महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य प्रथमङ्कात् उद्धृतोऽस्ति ।

अस्मिन श्लोके रथारूढः सन् राजा दुष्यन्तः एकं हरिणमनुगच्छति । अत्र अत्यन्तं वेगेन धावतः हरिणस्य चेष्टाः वर्णयन् राजा दुष्यन्तः सारथिं कथयति ।

व्याख्या - पश्य, पश्चात् धावन्तं मम रथं ग्रीवाभंगं कृत्वा पश्यति, ग्रीवाभंगकारणेन पुनः पुनः आबद्धदृष्टिः, बाणपतनभयात् स्वस्य पश्चादर्धिकेन भागेन अग्रभागं प्रविष्ट इव तथा श्रमकारणात् विवृतमुखात् पततः तथा अर्धचर्वितान् दर्भान् मार्गे विकिरन् अयं हरिणः उच्चैः कूर्दनात् आकाशे अधिकं तथा भूमौ अल्पमेव धावति ।

Renu Devi
09/10/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री - II खण्ड साहित्यम्

रघुवंशे चतुर्दशः सर्गः

प्र०(1) - पद्यमिदम् व्याख्येयम् ।

तेनार्थवाँल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान् ।

तेनास लोकः पितृमान्विनेत्रा तेनैव शोकापनुदेन पुत्री ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश-महाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति ।

व्याख्याः - श्रीरामः निर्लोभ आसीत् अतः श्रीरामः प्रजासु कमपि करं न प्रारब्धवान् फलतः कतिपयैरहोभिः प्रजा धनधान्यसम्पन्ना अभवत् । तस्य राज्ये निर्विघ्नताऽऽसीत्, अतः सर्वे नागरिकाः प्रसन्नतापूर्वकं यज्ञादीनां धार्मिक कार्याणां सम्पादनं कुर्वन्तिस्म, सः सर्वान् सुष्ठुप्रकारेण अचालयत् अतः सर्वे तं पितृवद् अमन्यन्त तथा विपत्तिकाले सर्वेभ्यः, साहाय्यं प्रदत्तवान् अतः असौ रामः प्रजायाः पुत्रोऽप्यासीत् ।

Renu Devi
09/10/20

राधा उमाकान्त सं० महावि० सुरखसेना
पूर्णिया

उपशास्त्री - I खण्ड साहित्यम तृतीय - पत्रम्

classmate
Date ______
Page ______

## रघुवंश महाकाव्यम्
### द्वितीय: सर्ग:

प्र० (1) - सकीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितः रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन श्लोके राजा दिलीपः वने सञ्चरन् लतासन्नगृहेषु वनाधिष्ठातृदेवताभिः गीयमानां निजां कीर्तिमाकीर्तितवान् । तत्र पुनः सच्छिद्रैः वंशैः वायुपूरणेन स्वनद्भिः वंशवाद्यस्य कार्यं स्वरदानरूपं समाचरितमिति भावः।

व्याख्या :- सः = राजा दिलीपः, मारुतपूर्णरन्ध्रैः = वायुपूर्णच्छिद्रैः अतएव, कूजद्भिः = स्वनद्भिः, कीचकैः = वेणुविशेषैः, आपादितवंशकृत्यं = सम्पादितमुरलीवाद्यकार्यं यथा स्यात्तथा, कुञ्जेषु = लतागृहेषु, वनदेवताभिः = काननदेवीभिः, उच्चैः = तारस्वरम्, उद्गीयमानं = प्रस्तूयमानम्, स्वं = आत्मीयम्, यशः = कीर्तिम्, शुश्राव = श्रुतवान् ।

Renu Devi
09/10/20

राधा उमाकान्त सं० महाविद्यालय सुखसेना,
पूर्णिया ।